# shrIsantAnagopAlakRiShNamantram

# શ્રીસન્તાનગોપાલકૃષ્ણમન્ત્રમ્

## Document Information

Text title : santAnagopAlakRRiShNamantram

File name : santAnagopAlakRRiShNamantram.itx

Category : vishhnu, krishna, vishnu, mantra

Location : doc_vishhnu

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : shrIlakShmIkaTAkSha S K Rajagopalan 2001 collection of Laxmistotras

Latest update : June 18, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 18, 2020

*sanskritdocuments.org*

# શ્રીસન્તાનગોપાલકૃષ્ણમન્ત્રમ્

સન્તાનગોપાલઃ - નીલવર્ણઃ
પિબન્તં ચ સ્તનં માતુઃ મુખં સંવીક્ષ્ય સુસ્મિતમ્ ।
અઙ્ગુલ્યગ્રે સ્તનં ચાન્યં સ્પૃશન્તં ચ મુહુર્મુહુઃ ॥

યશોદાઙ્ગસ્થિતં ગોપં ધ્યાયેત્પુત્રપ્રદં સદા ॥

(મૂલમન્ત્રેણ પ્રાણાનાયમ્ય - શ્રીસન્તાનગોપાલકૃષ્ણપ્રીત્યર્થે
શ્રીસન્તાનગોપાલમન્ત્રજપં કરિષ્યે - ઇતિ સઙ્કલ્પ્ય -)
ૐ પૂર્ણજ્ઞાનાત્મને હૃદયાય નમઃ ।
ૐ પૂર્ણૈશ્વર્યાત્મને શિરસે સ્વાહા ।
ૐ પૂર્ણપરમાત્મને શિખાયૈ વષટ્ ।
ૐ પૂર્ણાનન્દાત્મને કવચાય હું ।
ૐ પૂર્ણતેજાત્મને નેત્રાભ્યાં વૌષટ્ ।
ૐ પૂર્ણશક્ત્યાત્મને અસ્ત્રાય ફટ્ ।
ઇતિ દિગ્બન્ધઃ -
અસ્ય શ્રીદ્વાત્રિંશદક્ષર સન્તાનગોપાલકૃષ્ણમહામન્ત્રસ્ય -
(શિરસિ) - નારદ ઋષિઃ
(મુખે) - અનુષ્ટુપ્ છન્દઃ
(હૃદયે) - શ્રીસન્તાનગોપાલકૃષ્ણો દેવતા -
કં બીજં - સ્વાહા શક્તિઃ - શ્રીસન્તાનગોપાલકૃષ્ણપ્રીત્યર્થે જપે વિનિયોગઃ ।
ધ્યાનમ્
શઙ્ખચક્રધરં કૃષ્ણં રથસ્થં ચ ચતુર્ભુજમ્ ।
સર્વાભરણસંયુક્તં પીતવાસસમચ્યુતમ્ ॥

દ્વિજવર્યાર્જુનયુતં વિષ્ણુતેજોપબૃમ્હિતમ્ ।
સમર્પયન્તં વિપ્રાય નષ્ટાનાનીય બાલકાન્ ॥

કરુણામૃતસમ્પૂર્ણદૃષ્ટ્યૈક્ષન્તં ચ તં દ્વિજમ્ ।

ધ્યાત્વા જપાર્ચનાદીનિ કુર્યાદ્ભક્તિપરાયણઃ ।
પુત્રાર્થી સ્વસ્તિકે ન્યસ્ય તત્રસ્થં કૃષ્ણં પૂજયેત્ ॥

મૂલમન્ત્રઃ -
દેવકીસુત ગોવિન્દ વાસુદેવ જગત્પતે ।
દેહિ મે તનયં કૃષ્ણ ત્વામહં શરણં ગતઃ ॥

॥ એકલક્ષં જપેન્મન્ત્રં સિદ્ધિર્ભવતિ તત્ક્ષણાત્ ॥

દશાંશતર્પણં, તદ્દશાંશહોમઃ, પાયસેન તદ્દશાંશં
બ્રાહ્મણભોજનં, પુનરુપહારાર્થં પ્રાણાયામઃ, ષડઙ્ગન્યાસઃ,
ઋષ્યાદિ ન્યાસઃ, ધ્યાનઞ્ચ કુર્યાત્ ।

ઇતિ શ્રીસન્તાનગોપાલકૃષ્ણમન્ત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*shrIsantAnagopAlakRiShNamantram*
pdf was typeset on June 18, 2020

Please send corrections to *sanskrit@cheerful.com*